पृतिष्ठितंपूर्वंप्रधूमितोराज्ञांहृदयेग्निरिवोत्थितः पुरुहूतध्वजस्येवतस्योन्नयनपंक्तयः
रघु° नवाभ्युत्थानदर्शिन्योननंदुःसप्रजाःप्रजाः ४ छायामंडललक्ष्येणतमदृश्याकिलस्व
१६ यंपद्मापद्मातपत्रेणभेजेसाम्राज्यदीक्षितं ५ परिकल्पितसांनिध्याकालेकालेचवंदि
षुस्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेसरस्वती ६ मनुप्रभृतिभिर्मान्यैर्भुक्तायद्यपिराजभिः
तथाप्यनन्यपूर्वेवतस्मिन्नासीद्वसुंधरा ७ सममेवसमाक्रांतंद्वयंद्विरदगामिनाते
नसिंहासनंपित्र्यमखिलंचारिमंडलम् ८ नयविद्भिर्नवेराज्ञिसदसच्चोपदर्शितं
पूर्वएवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ९ मंदोत्कंठाःकृतास्तेनगुणाधिकतयागुरौ
फलेनसहकारस्यपुष्पोद्गमइवप्रजाः १० सहिसर्वस्यलोकस्ययुक्तदंडतयामनःआददे
नातिशीतोष्णोनभस्वानिवदक्षिणः ११ पंचानामपिभूतानामुत्कर्षंपुपुषुर्गुणाः नवेत
स्मिन्महीपालेसर्वंनवमिवाभवत् १२ यथाप्रह्लादनाच्चंद्रःप्रतापात्तपनोयथातथैवसो १६
भूदन्वर्थोराजाप्रकृतिरंजनात् १३ कामंकर्णांतविश्रांतेविशालेतस्यलोचने :०:

मिमे सदेगतसंलोच नैकां शततया दुरासदः तेवैवसंदेशहरा द्विषां पतिः अरेणा तिलोके श्री
तच्छा निधीपतां १० तेथैतिकामं पुत्तिअसुकानूरचोर्थथा अतंमातलिसारथ्यवैनप
यनो निमयमनासदेगर्हसूदहितासस नु राप्तिन्यवतंतं ११ तामथ्य नंदस्पथेमेण वोधितः पूजे
प्सरः शासनहारिणा हरेः वरामसानेहर्षचूसेनया शीनातदीपमंगं कुलिशव्रणांकितं
१२ तिविती प्रान्तेत्नेनवंघिकां महाकुत्तंतां महत्तीपशासनेः समाकरुद्दुदिवमापु
धः द्वपेतत्तेनेसापानेपरंपराभिव १३ पुष्पसंविमयव्याहृत्तामायया विसृजन्वेनेन्वत्ते
कुदंदत्ताखूनसितांतपवेंरांमुहुवनततरूछायाविद्वा! संपोसहंधि क्रियेगलितव
पसोमिलाकूणांमिदहिकुलवृतम १४ इति श्री रघुवंशे महाकाव्ये कविकालिदा
सकृतौ पूर्वतवर्णनोनामतृतीयः सर्गः ३ सरजन्ये सुरराजदत्तं पुत्रिणं घाघकं
वशी ध्विनैर्तिहितं हिजेस विजेवंदतामसनव १ मसद्रसंसु दिलीपं चेतं विजेमकवशी
पुरं राज्ञां मुदत्तनाराधेह दिग्ं सोमिवाग्निं तमेर २ दिलीपानंतरं राजो तं निशम्य

रघु तत्मुरतासी विछभी मदशस्त्रैः वमहत्वरसुरं तुमुलं जघे विछणोरधो मुखेस्तदसुरेषु पसुजेः ६१
ज्यानिपुवंधपूरितत्तासवृह्यहि भिसतमाप्रवंदुपुसहस्रतेजसः श्राणाकान्तिवधूपि तुनेवास
२५ दः स्वतपनुलेधाहि भिन्नाहुरं वुद्धः ६२ तत्तपकोपेहारिवंदनां कितेवमध्यमांतान्तांवधी
रंगादिनौरद्यः प्राणंकोहु मुखेनवक्रियाशरासनज्यामलुनाहिडिजसः ६३ सचाप
मुत्सर्जविव्रधमत्सरः पुराणश्राद्यपुवलसविहिर्दः महे [illegible] पवनयुवरापरागछितांस
त्युमांमंडलमसुमादरे ६४ रघुर्भशोवत्रासितिनन्ताद्विनःवर्पानमसौ सहसैनिकासुः
तेनेषुममात्रादयधूपततदव्यथांसरोच्चितः स्विन्नकहर्षनिम्नेनेः ६५ तथापिषासुब्रनराग
निरुद्धेविपदंभादेन्द्रैरसांतसुमः तनोत्ववितितिशायेनहृष्कांवद्धहिसनत्रगुणांनि
धायतेमस्पुसमाधमुद्धिन्तिनारवत्तयाकमेतदनेनविशोकमापुपंत्रवेगेमांपुर्तितम
सेतुरंगमाहूरदूसणीचेतितिनमारवासवः ६७ तनोति[illegible]कानदसे मुनिसतंस्तवसांपुखघुति २५
ईद्विशोगुलिनेरवृसनप्रदिसंहरन्प्रियुपियंवदपुसवदयांरपरः [illegible] मत्रुपादिमन्य
सेत्रमोततसमतेदृश्यनिवकनिश्रुजसुधीवापयतःसमगुरुः कुनोरशोभताकलनपुञ्जतांहृदपथाविरलांत

सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरं ५१ यदात्थ राजन्यकुमार तत्तथा यशस्तु
रक्ष्यं परतो यशोधनैः जगत्प्रकाशं तदशेषमिज्यया भवद्गुरोर्लंघयितुं ममोद्यतः ५२
हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव नापरः तथा विदुर्मां मुनयः शतक्र
तुं द्वितीयगामी न हि शब्द एष नः ५३ अतोयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयाप
हारितः अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ५४ ततः प्रहस्यापभयः
पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ५५
स एवमुक्त्वा मघवंतमुन्मुखः करिष्यमाणः सशरं शरासनं अतिष्ठदालीढविशेषशोभिना वपु
प्रकर्षेण विडंबितेश्वरः ५६ रघोरवष्टंभमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः नवांबुदानी
कमुहूर्तलांछने धनुष्यमोघं समधत्त मार्गणं ५७ दिलीपसूनोः स बृहद्भुजांतरं प्रविश्य भीमा
सुरशोणितोचितः पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितं ५८ हरेः कु
मारोपि कुमारविक्रमः सुरद्विपास्फालनकर्कशांगुलौ भुजे शचीपत्रविशेषकांकिते स्वनामचि
ह्नं निचखान सायकं ५९ जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं चुकोप
तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ६० तयोरुपांतस्थितसिद्धसैनिकं ग

1191

रघु. वनेममैवविघ्नेहृतस्तुरंगमो वसैघेन्वानिशम्येति वचः समीरितं तं मुदं परमाप दिलीप

नंदनः ४४ तदंगनिस्यंदजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सतां अतींद्रि

१४ येष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनंदनः ४५ स पूर्वतः पर्वतपक्षशातनं

ददर्श देवं नरदेवसंभवः पुनः पुनः सूतनिषिद्धचापलं हरंतमश्वं रथरश्मि

संयुतं ४६ शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः अवो

चदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ४७ मखांशभाजां प्रथमो मनी

षिभिस्त्वमेव देवेंद्र सदा निगद्यसे अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय क

थं प्रवर्त्तसे ४८ त्रिलोकनाथेन सदा मखद्विषः त्वया नियम्या ननु दिव्यचक्षुषा स चेत्स्व

यं कर्मसु धर्मचारिणां त्वमंतरायो भवसि च्युतो विधिः ४९ तदंगमग्र्यं मघवन् १४

महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि पथः श्रुतेर्दर्शयितार ईश्वराः मलीमसामाद

दते न पद्धतिं ५० इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसां निवर्तयामास [illegible]

तमोपहं दक्षसुता इवाबभुः ३६ युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः 1192
वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ३७ ततः प्रजानां चिरमात्मना
धृतां नितांतगुर्वीं लघयिष्यता धुरं निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवरा
जशब्दभाक् ३८ नरेंद्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितं अगच्छदंशेन
गुणाभिलाषिणी नवावतारं कमलादिवोत्पलं ३९ विभावसुः सारथिनेव वायुना घनव्य
पायेन गभस्तिमानिव बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ४० नियुज्य
तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतं अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्न
माप सः ४१ ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढविग्रहः ४२ विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत्
वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेथ नंदिनी ४३ स तदंबुना मार्जयत स्म लो

यौतदीयामवलंब्यचांगुलीं अभूच्चनम्रःप्रणिपातशिक्षयापितुर्मुदंतेनततानसोर्भकः२८
रघु॰ तमंकमारोप्यशरीरयोगजैःसुखैर्निषिंचंतमिवामृतंत्वचिउपांतसंमीलितलोचनोनृ
पश्चिरात्सुतस्पर्शरसज्ञतांययौ२९अमंस्तचानेनपरार्ध्यजन्मनास्थितेरभेत्तास्थितिमंतम
न्वयंस्वमूर्तिभेदेनगुणाग्र्यवर्तिनापतिःप्रजानामिवसर्गमात्मनः३०सवृत्तचूडश्चलका
१२ कपक्षकैरमात्यपुत्रैःसवयोभिरन्वितःलिपेर्यथावद्ग्रहणेनवाङ्मयंनदीमुखेनेवसमुद्र
माविशत्३१अथोपनीतंविधिवद्विपश्चितोविनिन्युरेनंगुरवोगुरुप्रियंअवंध्ययत्ना
श्चबभूवुरत्रतेक्रियाहिवस्तूपहिताप्रसीदति३२धियःसमग्रैःसगुणैरुदारधीः
क्रमाच्चतस्रश्चतुरर्णवोपमाःततारविद्याःपवनातिपातिभिर्दिशोहरिद्भिर्हरिता राम॰
मिवेश्वरः३३त्वचंसमेध्यांपरिधायरौरवीमशिक्षतास्त्रंपितुरेवमंत्रवत्नकेव
लंतद्गुरुरेकपार्थिवःक्षितावभूदेकधनुर्धरोपिसः३४महोक्षतांवत्सतरःस्पृशन्नि १२
वद्विपेंद्रभावंकलभःश्रयन्निवरघुःक्रमाद्यौवनभिन्नशैशवःपुपोषगांभीर्यमनोहरंवपुः३५
अथास्यगोदानविधेरनंतरंविवाहदीक्षांनिरवर्तयद्गुरुःनरेंद्रकन्यास्तमवाप्यसत्पतिं

भूवं चात्मनि २० सजातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते दिलीपसूनु
र्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ २१ सुखश्रवा मंगलतूर्यनिस्वनाः
प्रमोदनृत्यैः सह वारयोषितां न केवलं सद्मनि मागधीपतेः पथि व्यजृंभंत दिवौकसामपि २२
न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः ऋणाभिधानात्स्वयमेव केवलं
तदा पितॄणां मुमुचे स बंधनात् २३ श्रुतस्य यायादयमंतमर्भकस्तथा परेषां युधि चेति पार्थि
वः अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवं २४ पितुः प्रयत्नात्स सम
ग्रसंपदः शुभैः शरीरावयवैर्दिने दिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचंद्र
मा २५ उमावृषांकौ शरजन्मना यथा यथा जयंतेन शचीपुरंदरौ तथा नृपः सा च सुतेन मा
गधी ननंदतुस्तत्सदृशेन तत्समौ २६ रथांगनाम्नोरिव भावबंधनं बभूव यत्प्रेम परस्पराश्रयं वि
भक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत २७ उवाच धात्र्या प्रथमोदितं वचो ययौ

1194

1195

सदृशीं व्यधत्त सः ॥१०॥ सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः तयोपचारां
०रघु० जलिखिन्नहस्तया ननंद पारिप्लवनेत्रया नृपः ॥११॥ कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तै
रथ गर्भभर्मणि पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥१२॥ ग्रहैस्त
१२ तः पंचभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदं असूत पुत्रं समये शचीसमा त्रिसाध
१५ ना शक्तिरिवार्थमक्षयं ॥१३॥ दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे
बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशां ॥१४॥ अरिष्टशय्यां परितो
विसारिणा सुजन्मनस्तस्य निजेन तेजसा निशीथदीपाः सहसा हतत्विषो बभूवुरा
लेख्यसमर्पिता इव ॥१५॥ जनाय शुद्धांतचराय शंसते कुमारजन्मामृतसंमिताक्षरं राम
अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥१६॥ निवातपद्मस्तिमितेन १२
चक्षुषा नृपस्य कांतं पिबतः सुताननं महोदधेः पूर इवेंदुदर्शनाद्गुरुः प्रहर्षः प्रब

धी

निधे मनो बबन्धान्यरसान्विलंघ्य सा ३ न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु
केषु मागधी इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ४ उपेत्य
सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतं न हीष्टमस्य त्रिदिवेपि भूपतेरभू
दनासाद्यमधिज्यधन्वनः ५ क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा र
राज सा पुराणपत्रापगमादनंतरं लतेव संनद्धमनोज्ञपल्लवा ६ निधानगर्भामि
व सागरांबरां शमीमिवाभ्यंतरलीनपावकां नदीमिवांतःसलिलां सरस्वतीं नृपः स
सत्त्वां महिषीममन्यत १० दिनेषु गच्छत्सु नितांतपीवरं तदीयमानीलमुखं स्तनद्वयं तिर
श्चकार भ्रमराभिलीनयोः सुजातयोः पंकजकोशयोः श्रियं ११ प्रियानुरागस्य मनः
समुन्नतेर्भुजार्जितानां च दिगंतसंपदां यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः

1196

ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोक
२०५० पालानुभावैः ७५ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ नंदनीवरप्रदानो नाम
११ द्वितीयः सर्गः २ अथेप्सितं भर्त्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं नि
दानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौहृदलक्षणं दधौ १ शरीरसादादसमग्रभू
षणा मुखेन सालक्ष्यत लोध्रपांडुना तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशि
नेव शर्वरी २ मुखेन सा केतकपत्रपांडुना कृशांगयष्टिः परिमेयभूषणा स्थि
तास्पतारां करलोंदुमंडलां विभातकल्पां रजनीं व्यडंबयत् ३ ततो विशां पत्यु
रनन्यसंततेर्मनोरथं कोपि विवर्द्धनोदयो मुखं प्रपन्नो हार्दरसप्रदोहदे प्रिया ०राम०
पूर्वदेपूर्तिप्रियं वदौ ४ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृ ११
प्तिमाययौ करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं ५
दिवं मरुत्वानिव भोक्ष्यते भुवं दिगंतविश्रांतरथो हि तत्सुतः अतोभिलाषे प्रथमं तथा

ति

शपूर्वां सर्वांचापुनं रुक्मपैंवु ६८ सं नैदैनी सम्पं मानिं दितास्मा सद्रुमलें [illegible] तल निपीत 1198

कोर्षं पंपौव सिष्टेनं कृतांनुर्सः अदूंपशापृक्तीमिवां सिंहः सं: ६९ प्रातर्यथो क्ष्मवृत्त

पारणांते पुस्थानि वंसमा पनं पुत्रुजैतांदं पत्नीसां पृत्ति राज्ञधानीं पुस्थापवमास

न्वषीव सिष्ठः ७० पुरन्दित्री कर्तांहृत्तं हुतांशंत तलं लुलितां रंमकंधत्तीच भनुंस

वत्सांचैन्दपः पुत्रस्थैं सनंगलोद्यत तरंपभावः ७१ अजामिरामध्वनितारंथ

नं सधर्मपदसिंहि तंसहिसः वप्याधपादनुघात सुखेनं मार्गे स्थितेवल्लीन

मीहि मनोरथेनं ७२ तंतौन्द्रकंठमदर्पनं पूजां पुजार्घवृत्तकंधि नांगिनिद्रैः पवुस

प्रिंभवापुवर्धिनं वांदपंनाय मिश्रैस्वदीनां ७३ पुरं दरश्रीः पुरुहूत्यसं क्षेपु

पूर्वं पपृच्छानंघ मानः भुजें भुजंगें दं समानसारंभूयः स्व [illegible] स्मैं धुरमोपसेंस

७४ दांत्तमनं जलगा स्पृतार्थक्षेधं पक्वांऽप्रवरां ज्यावेत्ते सत्वस्थितिरिमजनां

ईर्षांयामादाय राज्ञः क्रियतेषा ७५ [illegible] यंन [illegible] ज्योतिरंगै [illegible] सुरसां दिवेति

1199

रघु

१० मयोद्भाव्य परीक्षितोसि ऋषिप्रभावान्मयि नांतकोपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥६२॥
भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते पुत्र वरं वृणीष्व न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नां ॥६३॥ ततः समानीय समानितार्थी हस्तौ स्वहस्तार्जितवी-
रशब्दः वंशस्य कर्तारमनंतकीर्तिं सुदक्षिणायां तनयं ययाचे ॥६४॥ संतानकामाय तथे-
ति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति त-
मादिदेश ॥६५॥ वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः औधस्यमि- रा० १०
च्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥६६॥ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञा-
पिता प्रीततरा बभूव तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥६७॥
तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य प्रहर्षचिह्नानुमितं प्रियायै

कथं नु शक्योनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां इमामनूनां सुरभेरवेहि रुद्रौ 1200
जसा तु प्रहृतं त्वयास्यां ॥५४॥ भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ स्थातुं
नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥५६॥ किमप्यहिंस्यस्तव चेन्मतोहं यशः
शरीरे भव मे दयालुः एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ॥५७॥ संबं
धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते तद्भूतनाथानुग नार्हसि त्वं संबन्धिनो
मे प्रणयं विहन्तुं ॥५८॥ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः स न्यस्त
शस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ॥५९॥ तस्मिन्क्षणे पालयितुः प्रजानामु
त्पश्यतः सिंहनिपातमुग्रं अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता
॥६०॥ उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ददर्श राजा जन
नीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहं ॥६१॥ तं विस्मितं धेनुरुवाच साधो मायां

रघु

६

अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वं ४७ भूतानुकंपा तव चे
दियं गौरेका भवेत्स्वस्तिमती त्वदंते जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पिते
व पासि ४८ अथैकधेनोरपराधचंडाद्गुरोः कृशानुप्रतिमाद्बिभेषि शक्योस्य मन्युर्भव
ता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ४९ तदक्षकल्याणपरंपराणां भोक्तारमूर्जस्व
लमात्मदेहं महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैंद्रमाहुः ५० एतावदुक्त्वा वि
रते मृगेंद्रे प्रतिस्वनेनास्य गुहागतेन शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवा
र्थमभाषतेव ५१ निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच धेन्वा तदध्यासि
तकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ५२ क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवने रूढ शि ५०
ढः राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ५३ सेयं स्वदेहार्पणनिष्क्र ६
येणान्याय्या मया मोचयितुं भवत्तः न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ५४

१२०२

परमेश्वरेणोऽपस्थितोऽभाशित्तपारणामे सुरद्विपेन्द्रो दुमसौ सुधैवं ३९ सर्वाणि वर्तन्ते वि
हायलज्जां गुरोर्भवाने दर्शितोऽसि ध्यामकैः प्रासे सारं तं पदे श क्य रदानेन ध्वशः श्रासुभ्रतौ
त्रियोगात्ति ४० इति पुत्रले पुरुत्राधिराजो भगाधिराज स्य वेत्ति श्रामपुत्रस्य स्नो सोगि
रिपुत्रपुत्रमालं वंदनं च चकार शिथिलीचकार ४१ पुत्रस्य वीक्ष्य नमिपुत्र पुत्रशोल सूर्यसंजेविलगु
पुत्रत्वंः जहो हि तत्सुं सर्कवीति तेन रुजं मुमुत्य न्निवर्वयन्नुपामिः ४२ संरुद्ध वे पुत्रलुभजें
द्रकामं हास्सं वचनमध्येदं हं विवतुः न्पुत्रर्गंतेपुत्रामत्तां हि वेद सर्वं भवाने मावमत्तोमि
धासे ४३ मान्यः सर्वेणापूर जो गमानां सर्गस्थितिपु त्रव्यवहार हेत्तुः गुरोरयोद्धप न
माहितांज नेशपहेतु रसानोऽनुये दृशीयं ४४ स त्वं मदीयेन शरीरवृत्तिं देहेन निर्
वर्तयितुं प्रसीद दिनावसानोत्सुकबालवत्सो विमुच्यतां धेनुरियं मम हर्षी ४५
अथ प्रीधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् भूयः स भूतेश्वरपार्श्व
वर्ती किंचिद्विहस्यार्थपतिं बभाषे ४६ एकातपत्रं जगतः प्रभुत्वं नवं वयः कांतमिदं वपुश्च

व

रघुवं सक्तांगुलिः सायकपुंखएव चित्रार्पितारंभइवावतस्थे ३१ बाहुप्रतिष्टंभविवृद्धमन्युरभ्य
र्णमागस्कृतमस्पृशद्भिः राजास्वतेजोभिरदह्यतांतर्भोगीवमंत्रौषधिरुद्धवीर्यः ३२ त
८ मार्यगृह्यंनिगृहीतधेनुर्मनुष्यवाचामनुवंशकेतुं विस्मापयन्विस्मितमात्मवृत्तौ सिंहोर
त्वंनिजगादसिंहः ३३ अलंमहीपालतवश्रमेणप्रयुक्तमप्यस्त्रमितोवृथास्या
न्नपादपोन्मूलनशक्तिरंहः शिलोच्चयेमूर्छतिमारुतस्य ३४ कैलासगौरंवृषमारु
रुक्षोःपादार्पणानुग्रहपूतपृष्टं अवेहिमांकिंकरमष्टमूर्तेः कुंभोदरंनामनिकुंभमि
त्रं ३५ अमुंपुरःपश्यसिदेवदारुंपुत्रीकृतोसौवृषभध्वजेन योहेमकुंभस्तननिःसृता
नांस्कंदस्यमातुःपयसांरसज्ञः ३६ कंडूयमानेनकटंकदाचिद्वन्यद्विपेनोन्म
थितात्वगस्य अथैनमद्रेस्तनयाशुशोचसेनान्यमालीढमिवासुरास्त्रैः ३७ त
दाप्रभृत्येववनद्विपानांत्रासार्थमस्मिन्नहमद्रिकुक्षौ व्यापारितःशूलभृताविधाय रा म०
सिंहत्वमंकागतसत्ववृत्तिः ३८ तस्यालमेषाक्षुधितस्यतृप्त्यैप्रदिष्टकालो ८

R03

नुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् २४ इत्थं व्रतं धारयतः प्रजार्थं समं महि 1204
ष्या महनीयकीर्त्तेः सप्तव्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य २५ अ
न्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गंगाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश २६ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहिते
क्षणेनालक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष २७ तदीयमा
क्रन्दितमार्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादाय नगेन्द्रसक्तां निवर्त्तया
मास नृपस्य दृष्टिं २८ स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं २९ ततो मृगेन्द्रस्य
मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः जाताभिषंगो नृपतिर्निषंगादुद्धर्तु
मैच्छत्प्रसभोद्धृतारिः ३० वामेतरस्तस्य करः प्रहर्त्तुर्नखप्रभाभूषितकंकपत्रे

१२०५

०रघु० ७

१७ सपल्लवोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौ मृगाध्यासि
तशाद्वलानि श्यामायमानानि वनानि पश्यन् १७ आपीनभारोद्वहनप्रयत्नाद्गृष्टि
र्गुरुत्वाद्वपुषो नरेंद्रः उभावलंचक्रतुरंचिताभ्यां तपोवनावृत्तिपथं गताभ्यां १८
वसिष्ठधेनोरनुयायिनं तमावर्त्तमानं वनिता वनांतात् पपौ निमेषालसपक्ष्म
पंक्तिरुपोषिताभ्यामिव लोचनाभ्यां १९ पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवध
र्मपत्न्या तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या २० प्रदक्षिणीकृत्य पयस्विनीं
तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसि
द्धेः २१ वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ भक्त्योपपन्नेषु हि त
द्विधानां प्रसादचिह्नानि पुरःफलानि २२ गुरोः सदारः स निपीड्य पादौ समाप्य सां
ध्यं च विधिं दिलीपः दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां
२३ तामंतिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः क्रमेण सुप्ताम

श्री व० ७

1206

क्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेतुमिव दुष्टसत्वान् ८ विसृष्टपार्श्वानुचरस्य
तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरा
वैः ९ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानं अवाकिरन्बाललताः प्र
सूनैराचारलाजैरिव पौरकन्याः १० धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणै
र्विशंकैः विलोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ स कीचकैर्मारुत
पूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वन
देवताभिः १२ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधिः तमातपक्लांत
मनातपत्रमाचारपूतं पवनः सिषेवे १३ शशाम वृष्ट्यापि विना दवाग्निरासीद्वि
शेषा फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने
१४ संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं प्रचक्रमे पल्लव
रागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५ तां देवतापित्रतिथिक्रियार्थामन्व
ग्ययौ मध्यमलोकपालः बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना

रघु०
०५

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्यां वनाय पीतप्रतिबद्धवत्सां यशोधने
धेनुमृषेर्मुमोच १ तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त्तनीया मार्गं मनुष्ये
श्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् २ निवर्त्य राजा दयितां दयालुस्तां सौरभे
यीं सुरभिर्यशोभिः पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीं ३
व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोप्यनुयायिवर्गः न चान्यतस्तस्य शरी
ररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ४ आस्वादवद्भिः कवलैस्तृणानां कं
डूयनैर्दंशनिवारणैश्च अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्पर
ोभूत् ५ स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबंधधीरः
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ६ स न्यस्तचिह्नामपि
राज्यलक्ष्मीं तेजोविशेषानुमितां दधानः आसीदनाविष्कृतदानराजिरंतर्म
दावस्थ इव द्विपेंद्रः ७ लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावं

स्थितायां स्थितिमाचरेः निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ८० वधूर्भक्ति

२ मती चैनामर्चितामा तपोवनात् प्रयाता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ८१ इत्याप्रस

सादादस्यास्त्वं परिचर्यापरो भव अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणां ८२ तथेति

प्रतिजग्राह प्रीतिमान्सपरिग्रहः आदेशं देशकालज्ञः शिष्यः शासितुरानतः ८३

ऽथ प्रदोषे दोषज्ञः संवेशाय विशांपतिं सूनुः सूनृतवाक्स्रष्टुर्विससर्जो

र्जितश्रियं ८४ सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः कल्पवित्कल्पयामा

स वन्यामेवास्य संविधां ८५ निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य

प्रयतपरिग्रहद्वितीयः तच्छिष्याध्ययननिवेदितावसानां संविष्टः कु

शशयने निशां निनाय ८६ इति श्रीरघुवंशे महाकाव्ये श्रीकाल

कृतौ वसिष्ठाश्रमगमनो नाम प्रथमः सर्गः लिखितं नेमिचन दीपालो ।

1209

विषेदीर्घसत्रस्यसचिरंदोनीप्रचेतसः भुजंगपिहितद्वारं यातालमधितिष्ठति ८० सन्त
२४० त्यर्कांतरंतस्यमर्दायोवकल्पमात्तरंधयात्याधवद्धसपत्नीकः सांवांकामंविधास्यति ८१ इति
०५ वादिनएवास्यहोतुराहुतिसाधनं अनिंद्यानंदिनीनामधेनुराववृतेवनात् ८२ लला
टोदयमाभुग्नंपल्लवस्निग्धपाटला बिभ्रतीश्वेतरोमांकंसंध्येवशशिनंनवं ८३ ता
मुंलालाटजांरजोंविभ्रतीसाक्षिनेनतरांसंध्याक्रांतिपदेनैवव्यक्तिमिन्नांहिमोशुना ८४
भुवंकोष्णेनकुंडोध्नीमेध्येनावभृथादपिप्रस्नवेनाभिवर्षंतीवत्सालोकप्रवर्ति
ना ८५ रजःकणैःखुरोद्धूतैःस्पृशद्भिर्गात्रमंतिकात् तीर्थाभिषेकजांशुद्धिमाद
धानामहीपतेः ८६ तांपुण्यदर्शनांदृष्ट्वानिमित्तज्ञस्तपोनिधिः याज्यमाशंसितावं
ध्यप्रार्थनंपुनरब्रवीत् ८७ अदूरवर्तिनींसिद्धिंराजन्विगणयात्मनः उपस्थिते
यंकल्याणीनाम्निकीर्तितेनरावयतः ८८ वन्यवृत्तिरिमांशश्वदात्मानुगमनेनगां ५
विद्यामभ्यसनेनेवप्रसादयितुमर्हसि ८९ प्रस्थितायांप्रतिष्ठेथाः ९०००

स नृ व्याधि ग १ पी ५ 1210

याहिनं छिन्नेन्नमीं कथं च ष्ठन्नेदू घोसि त्कं स्वयमिवं स्नेहा हुं ध्वमाजमम र्यादयै ७१ आसज्य
वडं भगवन्नाम यं महे हि मेअरुलुंदं छिवो ह्यानं नवद्ध्यदं तिनः ७२ तस्मात्पं यो
विमुच्यो हं सं विधातुं तथा हि सिद्ध्या कुरां दूरापयं त्वदधीनो हि सिद्धयः ७३ इति विज्ञा
पितो राज्ञा ध्यानसिमितलोचनः तयामा त्रं मयषिस्तं स्यो मुसमीनं इव ह्रदे ७४ सोपश्यत्स
माधानेन संतोरं स्त्रं मकारूपां मा विता लांसुवो भर्तुरपै नं प्रत्यं बोधपक् ७५ पुरापा
क्रमुपस्थाय तवोश्रीपुर्तियास्य नः आसीत्काल्यनतस्ध्यावामात्रितनास्तुरभिं पष्यि ७६
इमां इदीमरतुसंतो तांस्यः तासपादिसत्वरः पुदन्नशक्रिपानितस्तस्यां कोपमजीजनः ७७
प्रबजानासि मां यस्मादवत्तस्ते न भविष्यातिमत्प्रसूतिमनाराध्यप्रजेतिनां शशापणा ७८
स्वप्रायीनत्वपासराजर्न चस्मारपीनाक्रं तनदत्वां का प्रुगंगा यास्रोत स्युरामदिग्गजे ७९
इच्छितं तनयवस्नानानां छिछिंमा गलगात्मनं प्रुतिवध्रातिं हिमायज्ञ्यप्रजोथ्येसिक्रम ८० ह

ख

४

क्रियाश्चान्तरपात्रो भवति श्रमं यत्र सत्कुशलं राज्ये राज्ञा श्रमं मुनिर्मुनिः ॥ ८० ॥ पुण्यायर्व
विधेस्तस्य विजिताग्निपुरः पुरः अथवा सर्वपाति वञ्च मा ददेव वदन्तो वरः ॥ ८१ ॥ उपपन्नं ननु मा
ह्निर्दं सर्वस्वं जेषु पश्येत्यदेवीनां मानुषीणां च प्रतिकृत्तानि मा पदा ॥ ८२ ॥ नव मंत्रकृतो मं
त्रैर्दृष्टा त्वं पशुमिनाग्निभिः प्रत्यादिष्टं पतद्वनमिदं च लब्धामिदं पुमान् ॥ ८३ ॥ हविरावर्जितं
जीवी स्तोमिन्द्रा तकान्निरीतयः पत्मदीपाः प्रजा क्षत्रैर्नु स च हूयते वर्द्धसं ॥ ८४ ॥ उरुव्यथ
मानस्य गुरुरोगः बहुलयानि नाशा नु बन्धा कथं न स्युः संपदामेनिरापदः ॥ ८५ ॥ न्याहो न तत्र
विधिवदाजत बुधस्य भवति सस्यानामग्रहविग्रह वैरिणां ॥ ८६ ॥ त्वयैव न विनिर्मितं किंतु व
ध्वानवैनस्या मह [illegible] प्रजनमा भवति सद्दीपारत्नसूर्यविमादने ॥ ८७ ॥ न मर्द
दुर्लभं मन्ये नमा वाजिनाम याद पर्वूवेमनि [illegible] संकुनो [illegible] भुजनो ॥ ८८ ॥ नूनं मन्ये नपर
वंशपाः [illegible] विशेषदर्शिनः न प्रकाम भुजः [illegible] स्वधा [illegible] हृतनुराः ॥ ८९ ॥ सा ह्यनुज्या
विष्णुध्यानात्पुजालोपनि मिलितपुकाम [illegible] काएलो कोलाकद्रवावसः ॥ ९० ॥ लोका
नरसुरंपुरां त्यापादानमसुद्धवं सन्तति [illegible] वंश्याहि परत्रैव [illegible] ॥ ९१ ॥ न ४

दाश्रमं श्रांतवाहनः सायं संयमिनस्तस्य महर्षेर्महिषीसखः ४८ वनांतराद्उपावृत्तैस्कंधासक्त
समित्कुशैः ऽगुगिनधरैस्तु दुगज्माश्रतैः पूर्यमाणं तपस्विभिः ५० सेकांते मुनिकन्याभिस्तत्क्ष
णोज्झितवृक्षकं विश्वासाय विहंगानामालवालांबुपायिनां ५१ आतपात्ययसंक्षिप्तनी
वारासु निषादिभिः मृगैर्वर्तितरोमंथमुटजांगनभूमिषु ५२ आकीर्णमृषिपत्नीनां
उटजद्वाररोधिभिः अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ५३ अभ्युत्थिताग्निपि
शुनैरतिथीनाश्रमोन्मुखान् पुनानं पवनोद्धूतैर्धूमैराहुतिगंधिभिः ५४ कुलकं
अथ यंतारमादिश्य धूर्यान्विश्रामयेति सः तामवारोहयत्पत्नीं रथादवततार च ५५ तस्मै
सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ५६ विधेः साय
तनस्यांते स ददर्श तपोनिधिं अन्वासीनमरुंधत्या स्वाहयेव हविर्भुजं ५७ तयोर्जगृहतुः
पादान् राजा राज्ञी च मागधी तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननंदतुः ५८ तमातिथ्य

रघु
३

र्शैः शालनिर्यासगंधिभिः पुष्परेणूत्करैर्वातैराधूतवनराजिभिः ३९ मनोभिरामाः शृण्वंतौ र
थनेमिस्वनोन्मुखैः षड्जसंवादिनीः केका द्विधा भिन्नाः शिखंडिभिः ४० परस्परा
क्षिसादृश्यमदूरोज्झितवर्त्मसु मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ४१ श्रेणी
बंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिता
ननौ ४२ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्की
र्णैरस्पृष्टालकवेष्टनौ ४३ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां अमोघाः
प्रतिगृह्णंतावर्घानुपदमाशिषः ४४ हैयंगवीनमादाय घोषवृद्धानुपस्थितान् नामधेयानि
पृच्छंतौ वन्यानां मार्गशाखिनां ४५ सरसीष्वरविंदानां वीचिविक्षोभशीतलं आमोद
मुपजिघ्रंतौ स्वनिश्वासानुकारिणं ४६ कापि अभिख्या तयोरासीद्व्रजतोः शुद्ध
वेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ४७ तत्र भूमिपतिः पत्न्यै दर्शयन्
प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ४८ स दुष्प्रापयशाः प्राप ३

कफलागुरुम: २९ सवेलावप्रवलयांपरिखीकृतसागरांअनन्यशासनामुर्वींशशा
सैकपुरीमिव ३० तस्यदाक्षिण्यरूढेननाम्नामगधवंशजापत्नीसुदक्षिणेत्यासी
दध्वरस्येवदक्षिणा ३१ कलत्रवंतमात्मानमवरोधेमहत्यपितयामेनेमनस्वि
न्यालक्ष्म्याचवसुधाधिपः ३२ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः विलं
बितफलैःकालंसनिनायमनोरथैः ३३ संतानार्थायविधयेस्वभुजादवतारिता
तेनधूर्जगतोगुर्वीसचिवेषुनिचिक्षिपे ३४ गंगांभगीरथेनेवपूर्वेषांपा
वनक्षमां धृतासंततितेनन्यस्तामंत्रिषुकेवला: ३५ अथाभ्यर्च्यविधातारंप्रयतौपु
त्रकाम्ययातौदंपतीवसिष्ठस्यगुरोर्जग्मतुराश्रमं ३६ स्निग्धगंभीरनिर्घोष
मेकंस्यंदनमास्थितौप्रावृषेण्यंपयोवाहंविद्युदैरावताविव ३७ माभूदाश्रमपीडे
तिपरिमेयपुरःसरौअनुभावविशेषात्तुसेनापरिवृताविव ३८ सेव्यमानौसुखस्प

स्य गूढाकारेंगितस्य च फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव २० जुगोपात्मानमत्र
स्तो भेजे धर्ममनातुरः अगृध्नुराददे सोर्थमसक्तः सुखमन्वभूत् २१ ज्ञाने मौ
नं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः गुणा गुणानुबंधित्वात्तस्य सप्रसवा इव २२ अ
नाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना २३
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि स पिता पितरस्तासां केवलं जन्महेतवः २४
स्थित्यै दंडयतो दंड्यान्परिणेतुः प्रसूतये अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः २५
दुदोह गां स यज्ञाय सस्याय मघवा दिवं संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं २६
न किलानुययुस्तस्य राजानो रक्षितुर्यशः व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थि
ता २७ द्वेष्योपि संमतः शिष्टस्तस्यार्त्तस्य यथौषधं त्याज्यो दुष्टः प्रियोप्यासीदंगुलीवोरगक्ष
ता २८ तं वेधा विदधे नूनं महाभूतसमाधिना तथा हि सर्वे तस्यासन्परार्थै

वैवस्वतो मनुर्नाम माननीयो मनीषिणां । आसीन्महीक्षितामाद्यः प्रणवश्छंदसामिव ।११

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः । दिलीप इति राजेंदुरिंदुः क्षीरनिधाविव ।१२ व्यूढो-

रस्को वृषस्कंधः शालप्रांशुर्महाभुजः । आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः

।१३ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना । स्थितः सर्वोन्नतेनोर्वीं क्रांत्वा मेरु-

रिवात्मना ।१४ आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः । आगमैः सदृशारंभ आरंभ-

सदृशोदयः ।१५ भीमकांतैर्नृपगुणैः स बभूवोपजीविनामधृष्यश्च

अभिगम्यश्च यादोरत्नैरिवार्णवः ।१६ रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः प-

रं न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः ।१७ प्रजानामेव भूत्यर्थं स ताभ्यो

बलिमग्रहीत् । सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।१८ सेना परिच्छदस्तस्य

द्वयमेवार्थसाधनं । शास्त्रेष्वकुंठिता बुद्धिर्मौर्वी धनुषि चातता ।१९ तस्य संवृतमंत्र

वत्वमतानुशासनं सत्वकार्यार्थदर्शिनः १४ लब्धप्रशमनं स्वस्थमथैनं समुपस्थिता
पार्थिवीं ऋक्षहिजीयेव शरत्पंकजलक्षणा १५ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः १६ उपधिजा मातृपुंकातुं समयायरघोर्गिरैः
सधनुः प्रक्रियेणेन वसंजेकृत्लमनुना १७ वार्षिकं संजहारेंद्रो रघुर्जैत्रं धनुर्दधौ प्रजार्थ
साधने तौ हि पर्यायोद्यतकार्मुकौ १८ पुंडरीकातपत्रस्तं विकसत्काशचामरः ऋतुर्विडं
बयामास न पुनः प्राप तच्छ्रियं १९ प्रसादसुमुखे तस्मिन् चंद्रे च विशदप्रभे तदा चक्षुष्मतां प्री
२ तिरासीत्समरसा द्वयोः २० हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु विभूतयस्तदीयानां प
र्यस्ता यशसामिव २१ वसंतेऽस्मिन् हि रेफकारां कणौ प्रबल निपातितानां सरस्संवादिभिः कैते थ्या
तिजा थ्योजगुर्यशः २२ प्रससा इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयं आकुमारकथोद्घा
तं शालिगोप्यो जगुर्यशः २२ प्रससादोदयादंभः कुंभयोनेर्महौजसः रघोरभिभवाशंकि चुक्षु
भे द्विषतां मनः २३ मदोदग्राः ककुद्मंतः सरितां कूलमुद्रुजः लीलाखेलमनुप्रापुर्महोक्षा

1160

सप्तविक्रमं २४ ससत्वैः सप्तपर्णानां मदगंधिभिराहताः असूययेव तन्नागाः सप्तधैव प्रसु
२० स्रुवुः २५ सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान यात्रायै चोदयामास तं शक्तेः प्रथमं
१७ शरत् २६ तस्मै सम्यग्हुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ
२७ स गुप्तमूलपर्यन्तः शुद्धपार्ष्णिरयान्वितः षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया २८
अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः पृषतैर्मंदरोद्धूतैः क्षीरोर्मय इवाच्युतं २९ स ययौ
प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा अहितान्ननिलोद्धूतैस्तर्जयन्निव केतुभिः ३० रजो
भिः स्यंदनोद्धूतैर्गजैश्च घनसन्निभैः भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलं ३१ प्रता
पोऽग्रे ततः शब्दः परागस्तदनंतरं ययौ पश्चाद्रथादीति चतुःस्कंधेव सा चमूः ३२ म
रुपृष्ठान्युदंभांसि नाव्याः सुप्रतरा नदीः विपिनानि प्रकाशानि शक्तिमत्वाच्चकार सः ३३
पुरोगैः कलुषास्तस्य सह प्रस्थायिभिः कृशाः पश्चात्प्रयायिभिः पंकाश्चक्रिरे मार्गनिम्नगाः १७
३४ स सेनां महतीं कर्षन्पूर्वसागरगामिनीं बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३५

1161

त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः। तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ३६
पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी। प्राप तालीवनश्याममुपकंठं महोदधेः ३७ अन
म्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव। आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीं ३८ वंगा
नुत्खाय तरसा नेता नौसाधनोद्यतान्। निचखान जयस्तंभान् गंगास्रोतोंतरेषु सः ३९ आपा
दपद्मप्रणताः कलमा इव ते रघुं। फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ४० स तीर्त्वा क
पिशां सैन्यैर्बद्धद्विरदसेतुभिः। उत्कलादर्शितपथः कलिंगाभिमुखो ययौ ४१ स प्रतापं म
हेंद्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत्। अंकुशं द्विरदस्येव यंता गंभीरवेदिनः ४२ प्रतिजग्राह
कालिंगस्तमस्त्रैर्गजसाधनः। पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ४३ द्विषां विष
ह्य काकुत्स्थस्तत्र नाराचदुर्दिनं। सन्मंगलस्नात इव प्रतिपेदे जयश्रियं ४४ अप्रभूपत्तवाकानां
चरतां ... मर्मरः पवनोद्धूतराजतालीवनध्वनिः ४५ वायव्यास्त्रविनिर्धूतात्पद्मवि
द्धां महोदधेः। गजानीकात्स कालिंगं तादृशः सर्पिदूर्वा ... मिवोद्दधे ४६ तांबूलीनां दले

1162

रघु० स्तत्र रचितापानभूमयः नालकेरासवं योधाः शात्रवं च पपुर्यशः ४७ गृहीतप्रतिमुक्तस्य
स धर्मविजयी नृपः श्रियं महेंद्रनाथस्य जहार न तु मेदिनीं ४८ ततो वेलातटेनैव फ
१८ लवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यजयो ययौ ४९ स सैन्यपरिभोगेन गज
दानसुगंधिना कावेरीं सरितां पत्युः शंकनीयामिवाकरोत् ५० भयोत्सृष्टविभूषाणां
तेन केरलयोषितां अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ५१ रपाजाने पखरदुःसंभ
यत्केलात्तैत्तसंमर्वमांत्तेससपादया मकरटकोशाविलंरजः ५२ बलैरध्युषितास्तस्य
विजिगीषोर्गताध्वनः हृषित्तोत्तरष्टमारीवांमलयाद्रेसपत्यकाः ५३ ससंजुरश्वक्षुण्णानां
मेलानां मुत्पतिष्णवः तुल्यगंधिषु मत्तेभकटेषु फलरेणवः ५४ भोगिवेष्टनमार्गेषु चं
दनानां समर्पितं नास्रसत्करिणां ग्रैवं त्रिपदीछेदनामपि ५५ दिशिमंदायते तेजो दक्षिणस्यां
रवेरपि तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे ५६ ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः १८
ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ५७ स निर्विश्य यथाकामं तटेष्वालीनचंदनौ स्तनाविव
ली

1163

वद्दिशस्तस्याः शैलौ मलयदर्दुरौ ५८ असह्यविक्रमः सह्यं दूरमुक्तमुदन्वता नितंबमिव मेदि
न्याः स्रस्तांशुकमलंघयत् ५९ तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः रामास्त्रोत्सारितो
ऽप्यासीत्सह्यलग्न इवार्णवः ६० मुरलामारुतोद्धूतमगमत्कैतकं रजः तद्योधवारबाणाना
मयत्नपटवासतां ६१ खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु कटेषु करिणां पेतुः पुंनागेभ्यः
शिलीमुखाः ६२ अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ अपरान्तमहीपालव्याजेन र
घवे करं ६३ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं त्रिकूटमेव तत्रोच्चैर्जयस्तंभं चकार सः
६४ पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना इंद्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ६५
यवनीमुखपद्मानां सेहे मधुमदं न सः बालातपमिवाब्जानामकालजलदोदयः ६६ संग्रा
मस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ६७ भल्ला
पवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीं तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ६८ अपनी
तशिरस्त्राणाः शेषास्तं शरणं ययुः प्रणिपातप्रतीकारः संरंभो हि महात्मनां ६९ विनयंते स्म
तद्योधा मधुभिर्विजयश्रमं आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ७० ततः प्रतस्थे कौबेरीं

भासानिवरघुद्विपं पारेरुसैरिवोदीव्यानुद्दरिवान्तरसंमिर्व ७१ जित्वानजप्यस्तापिवकृ

रघु० त्वारणपुरःसवानंम्रहार्णाविम्भिर्वोर्वीर्गिः पूर्ववेप्लोत्तरापथं ७२ विनीताध्वश्रमास्तस्यवं

१६ कृतीरविवेष्टनैर्दुधुवुर्वाजिनःस्कंधान्लग्नकुंकुमकेसरान् ७३ तत्रहूणावरोधानांभर्तृषु

व्यक्तविक्रमं कपोलपाटलादेशिवभूवरघुचेष्टितं ७४ कांबोजाः समरेसोढुं तस्यवीर्यमनी

श्वराः गजालानपरिक्लिष्टैरक्षोटैःसार्धमानताः ७५ तेषांसदश्वभूयिष्ठास्तुंगाद्रविणराशयः

विविशु[illegible]नोत्सेकाः [illegible] ७६ ततोगौरीगुरुंशैलमारुरोहाश्वसाधनः वर्धयन्निव

तत्कूटानुद्धूतै[illegible]भिः ७७ शशंसतुल्यसत्त्वानां सैन्यघोषेप्यसंभ्रमं गुहाशयानांसिंहानांपरिवृत्या

वलोकितं [illegible] भूर्जेषुमर्मरीभू[illegible]ध्वनिहेतवः गंगाशीकरिणोमार्गेमरुतस्तंसिषेविरे

७९ विशश्रमु[illegible]छायास्वध्यास्यसैनिकाः दृषदोवासितोत्संगानिषण्णमृगनाभिभिः ८० सर

लासक्तमातंगग्रैवेयस्फुरितत्विषः आसन्नोषधयोनेतुर्नक्तमस्नेहदीपिकाः ८१ तत्रजन्यंर राम०

घोर्घोरंपार्वतीयैर्गणैरभूत् नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ८२ तस्योत्सृष्टनि १६

वासेषुकंठरज्जुक्षतत्वचः गजवर्ष्मकिरातेभ्यःशशंसुर्देवदारवः ८३ शरैरुत्सव

संकेतात्सहकृत्वा विरतोत्सवानजवोदाहामसां वाहूोर्गोपरमासंकिनयान्तं ८४ परस्परेणां
विज्ञातं सखिबुपायनपाणिगृहराज्ञाहिमवंशोसरोराहरोहिमाद्रिणां ८५ ततोमध्येयरे
राशिं निवेशयामासस्वेहसः राज्ञापोलसन्नुदैतसादेसदम्नउत्थिये ८६ चकंपेनिर्णो
लोहितसेनक्षि... ज्ञानिषेपवरद्धुज्ञा... नतोपुनः स्वकालागरुद्रुमैः ८७ नपुसेद
ह स्फुहाकं... नंरथवर्मी ... ज्ञोस्यकृतरावयताकिना ८८ तमीशः कामसूत्राणां
मत्वाखडल्लावि... केटैर्गौरल्लतुपरत्नेष्वपि ८९ काम रूपेश्वरसस्पहेम
पीठाधिदेवतां रत्नपुष्पोपहारेणाच्छायामार्चयत्पादयोः ९० इति जित्वा दिशो जिष्णुर्न्य
वर्त्ततरथोद्धतं ... विश्रामयन्नेषां ... पुमौलिषु ९१ सविश्वजितमाजह्रे यज्ञं
सर्वस्वदक्षिणं ... हिविसर्गाय सतांवारिमुचामिव ९२ सत्त्रान्ते सचिवसखः पुरस्क्रिया
भिर्गुर्वीभिः शमितपराजयव्यलीकान् काकुत्स्थश्चिरविरहोत्सुकावरोधान् राजन्यान्स्वपुरनिवृ
त्तयेनुमेने ... कुलिशात्रपत्रचिह्नं सम्राजश्चरणयुगं प्रसादलभ्यं प्रस्थानप्रणतिभि

1166

...तौ

नींदंगुलीबुंबकुमोन्विसुकच्युकमकरहरेणुओर्देश्च पशंतेलमधुमच्या मिवेकपूनं सलारैः श
मितषुराजयव्यलीकोः ग्रामं सोत्सुकदंति नानि नच्छूरक्षाः स्वानि स्वामेव निभुजः पुराणि जग्मुः ६५
२० इति श्री रघुवंशे [illegible] लोकाविकालिदासकृतौ दिग्विजयो नाम चतुर्थः सर्गः ४ तं मध्वरे विश्व
जिति क्षितीशं [illegible] विश्राणितकोशजातं उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतंतु
शिष्यः १ स मृन्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घ्यशीलः श्रुतप्रकाशं यशसा प्र
काशः प्रत्युज्जगामातिथिमातिथेयः २ तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधन
अग्रयायी [illegible] २ [illegible] जमभारात्कृतांजलिः कृत्यविदित्युवाच ३ अप्यग्रणीर्मंत्रकृ
तामृषीणां [illegible] कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वया ज्ञानमशेषमाप्तं लो[illegible]चैतन्यमुष्णादिव दीधितेन
४ कायेन वाचा मनसा च शश्वद्यत्संभृतं वासवधैर्यलोपि आपद्यते न व्ययमंतरायैः रा म
कच्चिन्महर्षेस्त्रिविधं तपस्तत् ५ आधारबंधप्रमुखैः प्रयत्नैः संवर्धितानां सु २०
तनिर्विशेषं कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम् ६ रा०

1167

जकांतिरावेदितो वेदविदां वरेण एनोनिवृत्तेंद्रियवृत्तिरेनं जगाद भूयो जगदेकना
थः २३ गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामं गतो वदान्यांत
रमित्ययं मे मा भूत्परीवादनवावतारः २४ स त्वं प्रशस्ते महिते मदीये वसंश्चतु
र्थोऽग्निरिवाग्न्यगारे द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थं
२५ तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा गामात्मसारां
रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् २६ वसिष्ठमंत्रोक्षणजात्प्रभावा
दुदन्वदाकाशमहीधरेषु मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य
२७ अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं सामंतसंभावनयै
व धीरः कैलासनाथं तरसा जिगीषुः २८ प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः
कोषगृहे नियुक्ताः हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः २९ तं

रघुः

भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् दिदेश कौत्साय समस्तमेव
र॰वं॰ पादं सुमेरोरिव वज्रभिन्नं ३० जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनंद्यस
त्वौ गुरुप्रदेयाधिकनिस्पृहोर्थी नृपोर्थिकामादधिकप्रदश्च ३१ अथोष्ट्रवामीशतवाहितार्थं प्रजेश्व
रं प्रीतमना महर्षिः स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ३२॥
२२ किमत्र चित्रं यदि कामसूर्भूः वृत्ते स्थितस्याधिपतेः प्रजानां अचिंत्यनीयस्तु तव प्रभावो म
नीषितं द्यौरपि येन दुग्धा ३३ आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुष
स्ते पुत्रं लभस्वात्मगुणानुरूपं भवंतमीड्यं भवतः पितेव ३४ इत्थं प्रयुज्याशिषमग्र
जन्मा राज्ञे प्रतीयाय गुरोः सकाशं राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जी
वलोकः ३५ ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारं अतः पिता ब्रह्मण २२
एव नाम्ना तमात्मजन्मानमजं चकार ३६ रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्न
तत्वं न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ३७ उपात्तविद्यं

1168

1169

क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु तदंकशय्याच्युतनाभिना
लाकच्चिन्मृगीणामनघा प्रसूतिः ॥७॥ निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापा
ञ्जलयः पितृणां तान्युञ्छषष्ठांकितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ॥८॥
नीवारपाकादि कडंगरीयैरामृश्यते जानपदैर्न कच्चित् कालोपपन्नातिथिकल्प
भागं वन्यं शरीरस्थितिसाधनं वः ॥९॥ अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुम
तो गृहाय कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥१०॥ तवार्हतो ना
भिगमेन तृप्तं मनो नियोगक्रियायोत्सुकं मे अप्याज्ञया शासितुरात्मना वा प्राप्तोसि सं
भावयितुं वनान्मां ॥११॥ इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य स्वार्थोपपत्तिं
प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ॥१२॥ सर्वत्र नः वार्तमवेहि राजन्नाथे कुतस्त्वय्य
शुभं प्रजानां सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥१३॥ भक्तिः प्रतीक्ष्येषु कु
लोचिता ते पूर्वान्महाभाग तयातिशेषे व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति

मेविषादः १४ शरीरमात्रेण नरेंद्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः आरण्यकोपा
त्तफलप्रसूतिः स्तंबेन नीवार इवावशिष्टः १५ स्थाने भवानेकनराधिपः सन्नकिंच
नत्वं मखजं व्यनक्ति पर्य्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः १६
२.५० तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये स्वस्त्यस्तु ते निर्गलितांबुगर्भं श
२२ रद्घनं नार्दति चातकोपि १७ एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषि
ध्य किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुंक्तः ततो यथावद्विहिताध्वराय त
स्मै स्मयावेशविवर्जिताय वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे १९
समाप्तविद्येन मया महर्षिर्विज्ञापितोभूद्गुरुदक्षिणायै स मे चिरायास्खलितोपचारां तां भ
क्तिमेवागणयत्पुरस्तात् २० निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः वित्तस्य राम
विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति २१ सोहं सपर्याविधिभाजनेन मत्वा भवंतं २२
प्रभुशब्दशेषं अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य २२ इत्थं द्विजेन द्विजरा

1170

धिजद्रुरुम्यलंयौवनेहेदविशेषकांतं श्रीगंतुकामापि गुरोरनुज्ञां धीरेव कन्या पितुराचकां
दे॥३८॥ अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिंदुमत्याः आप्तः कुमारानयनोत्सु
केन भोजेन दूतो रघवे विसृष्टः॥३९॥ तं श्लाघ्यसंबंधमसौ विचिंत्य दारक्रियायोग्यदशं च पु
त्रं प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानी॥४०॥ तस्योपकार्यारचितोपचा
रा वन्येतरा जानपदोपदाभिः मार्गे निवासा भुवनेंद्रसूनोर्बभूवुरुद्यानविहारकल्पाः॥४१॥
स नर्मदारोधसि शीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले निवेशयामास विलंघिताध्वा क्लांतं र
जोधूसरकेतु सैन्यं॥४२॥ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितांतःसलिलप्रवेशः निध
र्धौतदानामलगंडभित्तिर्वन्यः सरित्तो गज उन्ममज्ज॥४३॥ निःशेषविक्षालितधातुनापि वप्रक्रि
यामृक्षवतस्तटेषु नीलोर्ध्वरेखाशबलेन शंसन् दंतद्वयेनाश्मविकुंठितेन॥४४॥ स भोगिभोगा
धिकपीवरेणांसं वप्रस्थिताद्गु पुलिनेन दीर्घानुच्छिदेप तीराभिमुखः सप्राहं सेनवारि पर्यघाति नि
वो मीन॥४५॥ संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दं बभौ स भिंदन् बृहतस्तरं

२
२३

1172

न्वोर्गंगलाभंग इव प्रवृत्तः ॥४६॥ कारंडवोत्सृष्टमदुप्रतानाः पुलिंदयोषांबुविहारकांचीः क
र्षन्सशैवाललतानदीभः प्रवाहलग्नास्तदमुत्ससर्प ४७ तस्यैकनागस्यकपोलभित्त्योर्जला
वगाहक्षणमात्रशांता वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः ४८ सप्तच्छदक्षीरक
टुप्रवाहमसह्यमाघ्राय मदं तदीयं विलंघिताधोरणतीव्रयत्नाः सेनागजेंद्रा विमुखा बभूवुः
४९ सच्छिन्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन रामापरित्राणविहस्तयोधं से
नानिवेशं तुमुलं चकार ५० तमापतंतं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः निवर्त
यिष्यन्विशिखेन कुंभे जघान नात्यायतकृष्टशार्ङ्गः ५१ स विद्धमात्रः किल नागरूपमुत्सृज्य
तद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामंडलमध्यवर्त्ति कांतं वपुर्व्योमचरं प्रपेदे ॥५२॥ अथ प्रभ
वोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः उवाच वाग्मी दशनप्रभाभिः संवर्द्धितोर
स्थलतारहारः ॥५३ मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वं अवेहि

राम०
२३

गंधर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ५५ स चानुनीतः प्रणतेन पश्चान्मया मह
र्षिर्मृदुतामगच्छत् उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ५५ इक्ष्वाकु
वंशप्रभवो यदा ते भेत्स्यत्यजः कुंभमयोमुखेन संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनि
धिर्मां ॥५६॥ संमोचितः सत्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे
स्यात्स्वपदोपलब्धिः ५७ संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रं गांधर्वमादत्स्व यतः
प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ५८ अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि
त्वं तस्मादुपच्छंदयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यं ५९ तथेत्युपस्पृश्य पयः पवित्रं सो
मोद्भवायाः सरितो नृसोमः उदङ्मुखः सोऽस्त्रविदस्त्रमंत्रं जग्राह तस्मान्निगृहीतशापात् ६०
एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिंत्यहेतु एको ययौ चैत्ररथप्रदेशान्सौराज्यर
म्यानपरो विदर्भान् ६१ तं तस्थिवांसं नगरोपकंठे तदागमारूढगुरुप्रहर्षः प्रत्युज्जगाम क्रथकैशि
केंद्रश्चंद्रं प्रवृद्धोर्मिरिवोर्मिमाली ६२ प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः मेने
यथा तत्र जनः समेतौ वैदर्भमागंतुकमजं गृहेशं ६३ तस्याधिकारिपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वार

वेदिविशितपूर्णकुंभां रम्यां रघुप्रतिनिधिः सनेबोपकार्यां वाल्यात्परामिव दशां मदनोध्युवास ६४
रघु० तत्र स्वयंवरसमाहृतराजलोकं कन्याललामकमनीयमजस्य लिप्सोः भावावबोधकलुषा दयितेव
रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव ६५ तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्द
२४ कृशांगरागं वैतालिका ललितबंधमनोहराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः ६६ रात्रि
र्गता मतिमतां वर मुंच शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता तामेकतस्तव बिभर्ति गुरुर्विनिद्र
स्तस्या भवानपरधुर्यपदावलंबी ६७ निद्रावशेन भवताप्यनवेक्षमाणा पर्युत्सुकत्वमबला
निशि खंडितेव लक्ष्मीर्विनोदयति येन दिगंतलंबी सोपि त्वदाननरुचिं विजहाति चंद्रः ६८
तद्वल्गुना युगपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहतां द्वे प्रस्पंदमानपरुषेतरतारमंत
श्चक्षुस्तव प्रचलितभ्रमरं च पद्मं ६९ वृंतश्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणांशु रा०
भिन्नैः स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमारुतस्य ७० ताम्रोद २४
रेषु पतितं तरुपल्लवेषु निर्धौतहारगुलिकाविशदं हिमांभः संलसते दशनचंद्रिक [illegible] मिहं हु वि
कोशलस्य तं लब्धपरभागमिव स्मितं ते ७१ यावत्प्रतापनिधिराक्रमते न भानुरह्नाय तावदरु

णेन तमो निरस्तं आयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ७२
शय्यां जहत्युभयपक्षविनीतनिद्राः स्तंबेरमा मुखरशृंखलकर्षिणस्ते येषां विभांति तरुणा
रुणरागयोगाद्भिन्नाद्रिगैरिकतटा इव दंतकोशाः ७३ दीर्घेष्वमी नियमिताः पटमंडपेषु नि
द्रां विहाय वनजाक्ष वनायुदेश्याः वक्त्रोष्मणा मलिनयंति पुरोगतानि लेह्यानि सैंधवशिला
शकलानि वाहाः ७४ भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भेदशून्
याः प्रदीपाः अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मंजुवाक्पंजरस्थः
७५ इति विरचितवाग्भिर्बंदिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार मदपटुनि
नदद्भिर्बोधितो राजहंसैः सुरगज इव गांगं सैकतं सुप्रतीकः ७६ अथ विधिमवसाय्य शास्त्रदृष्टं
दिवसमुखोचितमंचिताक्षिपक्ष्मा कुशलविरचितानुकूलवेषः क्षितिपसमाजमगात्स्वयंवरार्थं ७७
मुखमर्द्धं शरीरस्य सर्वं वा मुखमुच्यते तत्रापि नासिका श्रेष्ठा नासिकापाश्च लोचने ७८ इति श्री
रघुवंशे महाकाव्ये कालिदासकृतौ स्वयंवराभिगमनो नाम पंचमः सर्गः ५